iv. शान्तिमयं जीवनमेव श्रेयस्करम्। .............................. ..............................

v. आनन्दमयं सुखमयम् च विद्यार्थिजीवनम्। .............................. ..............................

**स्त्री-प्रत्ययाः**

(देश की बहुत सी भाषाओं में स्त्री-प्रत्ययान्त शब्दों का प्रयोग होता है जिन्हें हम सहजता से समझ सकते हैं।)

पुल्लिङ्गशब्देभ्यः स्त्रीलिङ्गपदनिर्माणाय ये प्रत्ययाः प्रयुज्यन्ते ते स्त्रीप्रत्ययाः इति कथ्यन्ते। प्रमुखाः स्त्रीप्रत्ययाः सन्ति —

**(क) टाप्, डाप्, चाप् (एषु 'आ' अवशिष्यते।)**

**(ख) ङीप्, ङीष्, ङीन् (एषु 'ई' अवशिष्यते।)**



© NCERT not to be republished

(क) यथा–

| | | | | | |
|---|---|---|---|---|---|
| अज | - | अजा | बालक | - | बालिका |
| बाल | - | बाला | सेवक | - | सेविका |
| सरल | - | सरला | नायक | - | नायिका |
| कृष्ण | - | कृष्णा | मूषक | - | मूषिका |

(ख) यथा–

| | | | | | |
|---|---|---|---|---|---|
| गोप | - | गोपी | मृदु | - | मृद्वी |
| देव | - | देवी | पटु | - | पट्वी |
| नद | - | नदी | साधु | - | साध्वी |
| व्याघ्र | - | व्याघ्री | गुरु | - | गुर्वी |

## अभ्यास:

**1. प्रदत्तवाक्येषु लिङ्गपरिवर्तनं कृत्वा वाक्यानि पुन: लिखत-**

**यथा- एक: बाल: जलं पातुम् इच्छति। एका बालिका जलं पातुम् इच्छति।**

i. स: सेविकाम् आकारयति। ....................................

ii. अस्य नाटकस्य नायक: क: अस्ति? ....................................

iii. आचार्य: स्नेहेन पाठयति। ....................................

iv. चतुरा बालिका सम्माननीया। ....................................

v. श्रीमान् कुत्र गच्छति? ....................................

vi. सभायाम् अनेके विद्वांस: आगच्छन्। ....................................

vii. बुद्धिमान् बाल: पुरस्कारं लभते। ....................................

viii. गतवती महिला किम् उक्तवती? ....................................

© NCERT not to be republished

9

0975CH09

# समासा:



(अध्यापक: कक्षायां प्रविशति। छात्रा: उत्थाय अभिवादनं कुर्वन्ति।

अध्यापक: – (एकं छात्रम् उद्दिश्य) पङ्कज! किमर्थं खिन्न: इव दृश्यसे?

पङ्कज: – गुरुवर! एष शुभङ्कर: माम् सर्वदा 'पङ्के जात:' इति सम्बोधयति। न रोचते एतत् मह्यम्।

मनोज: – आम् गुरुवर! एष: माम् अपि 'मनसि जायते' इति उपहसति।

यशोदा – परम् यदा एष: माम् 'यश: ददाति या' इति कथयति तदा अहं तु प्रसन्ना भवामि।

घनश्याम: – माम् अपि एष: 'घन इव श्याम:' इति कथयति।

सुरेश: – माम् तु एष 'सुराणाम् ईश:' इति कथयति।

सर्वे छात्रा: – गुरुवर! कृपया एनम् अवबोधयतु येन स: एवं मा व्यवहरेत्।

अध्यापक: – (विहस्य) शुभङ्कर! किं त्वम् आत्मन: नाम अपि 'शुभं करोति' इति एवम् उच्चारयसि?

(सर्वे छात्रा: उच्चै: हसन्ति।)

अध्यापक: – भो छात्रा:! भवताम् नाम्नां कृते शुभङ्कर: यानि कानि अपि पदानि प्रयोजयति तानि न कथमपि अनुचितानि। वस्तुत: स: युष्माकं नाम्नां विग्रहम् एव प्रयोजयति।

छात्रा: – कृपया विस्तरेण बोधयन्तु।

अध्यापक: – बाढम्। ध्यानेन एतत् कथनं शृणुत- एकदा नीले अक्षिणी यस्या:, सा माता च पिता च, तौ प्रणम्य, लम्बम् उदरम् यस्य तम्, घन इव श्यामम्, पार्वती च परमेश्वर: च, तौ प्रणतवती, गृहस्य उद्याने विशाल: च एष: वृक्ष:, तत्र आरूढम् एकं वानरम् अपश्यत्।

छात्रा: – गुरुवर! भवत: कथनम् अवगन्तुम् अक्षमा: वयम्।

अध्यापक: – अधुना पुन: शृणुत- एकदा नीलाक्षी पितरौ प्रणम्य लम्बोदरं घनश्यामं पार्वतीपरमेश्वरौ च प्रणतवती। तत: गृहोद्याने विशालवृक्षारूढम् एकं वानरम् अपश्यत्।

प्रथमं मया यानि पदानि प्रयुक्तानि तानि विग्रहवाक्यानि आसन्। पुन: मया तत्स्थाने समस्तपदानि प्रयुक्तानि। एतद्विषयं विस्तरेण एवम् अवगच्छाम: - यदा अनेकपदानां स्थाने विभक्तिलोपं कृत्वा एकपदं प्रयुज्यते तदा तत् पदं समस्तपदं भवति। समासप्रक्रियायाम् अनेन भाषासौष्ठवं लाघवं च परिज्ञायते। कथितमस्ति - **'समसनं समास:।'**

समासस्य मुख्यत: चत्वार: भेदा: सन्ति - अव्ययीभाव:, तत्पुरुष:, द्वन्द्व:, बहुव्रीहिश्च। तत्पुरुषस्य अन्यौ द्वौ मुख्यौ भेदौ अपि स्त: - कर्मधारयंद्विगुश्च। एतदतिरिक्तम् अलुक्, नञ्, उपपदतत्पुरुष: च अस्य भेदा: भवन्ति।

अस्मिन् अध्याये वयम् केवलं तत्पुरुष-द्विगु-द्वन्द्व-समासानां विशिष्टम् अभ्यासं करिष्याम:।

## तत्पुरुष: समास:
## (उत्तरपदप्रधान: तत्पुरुष:)

अस्मिन् समासे उत्तरपदं प्रधानं भवति। विग्रहे पूर्वपदेन सह विभक्तिप्रयोग: भवति। विग्रहे या विभक्ति: प्रयुज्यते तया नाम्ना एवास्य तत्पुरुष-समासस्य नाम भवति।

यथा —

| समस्तपदानि | विग्रह: | समासनाम |
|---|---|---|
| शरणागत: | शरणम् आगत: | द्वितीय-तत्पुरुष: |
| हरित्रात: | हरिणा त्रात: | तृतीया-तत्पुरुष: |
| पाकशाला | पाकाय शाला | चतुर्थी-तत्पुरुष: |
| रोगमुक्त: | रोगात् मुक्त: | पञ्चमी-तत्पुरुष: |
| राजपुरुष: | राज्ञ: पुरुष: | षष्ठी-तत्पुरुष: |
| जलमग्न: | जले मग्न: | सप्तमी-तत्पुरुष: |
| युधिष्ठिर: | युधि स्थिर: | अलुक्-तत्पुरुष: |

| | | |
|---|---|---|
| कुम्भकार: | कुम्भं करोति इति | उपपद-तत्पुरुष: |
| अज्ञानम् | न ज्ञानम् इति | नञ्-तत्पुरुष: |

- नञ्-तत्पुरुषे यदि पदस्य प्रथमवर्ण: स्वर: भवति तदा समस्तपदे 'न' स्थाने 'अन्' प्रयुज्यते परं यदि शब्दस्य प्रथमवर्णं व्यञ्जनं भवति तदा 'न' स्थाने 'अ' प्रयुज्यते।

### द्विगु: समास:
### (संख्यापूर्वो द्विगु:)

यस्मिन् समासे प्रथमपदं संख्यावाचि भवति समाहारस्य (एकत्रीकरणस्य) च भाव: अस्ति स: द्विगुसमास: भवति।

यथा —

| **समस्तपदम्** | **विग्रह:** |
|---|---|
| पञ्चपात्रम् | पञ्चानां पात्राणां समाहार: |
| चतुर्युगम् | चतुर्णां युगानां समाहार: |
| त्रिभुवनम् | त्रयाणां भुवनानां समाहार: |
| अष्टाध्यायी | अष्टानाम् अध्यायानां समाहार: |

### द्वन्द्व-समास:
### (उभयपदार्थप्रधानो द्वन्द्व:)

द्वन्द्वसमासे उभयो: पदयो: प्रधानता भवति। विग्रहे प्रतिपदं पश्चात् 'च' इति पदस्य प्रयोग: भवति।

यथा —

| **समस्तपदम्** | **विग्रह:** |
|---|---|
| रामकृष्णौ | राम: च कृष्ण: च |
| पितरौ/मातापितरौ | माता च पिता च |
| कन्दमूलफलानि | कन्दं च मूलं च फलं च |
| पाणिपादम् | पाणी च पादौ च |

### अभ्यास:

**1. प्रदत्तपदानां विग्रहं कृत्वा समासनाम लिखत —**

| **समस्तपदम्** | **विग्रह:** | **नाम** |
|---|---|---|
| **विद्यालय:** | **विद्याया: आलय:** | **तत्पुरुष:** |
| i. सप्तर्षि: | .................................... | .................................... |
| ii. खलसज्जनौ | .................................... | .................................... |

© NCERT not to be republished

iii. गृहोद्याने .................. ..................

iv. विभवहीना: .................. ..................

v. चतुर्भुजम् .................. ..................

vi. पत्रपुष्पे .................. ..................

vii. लौहघटिता .................. ..................

viii. खगोत्तम: .................. ..................

ix. सुखदु:खे .................. ..................

x. त्रिलोकी .................. ..................

**2. प्रदत्तपदेषु समासं कृत्वा समासनाम लिखत —**

| **विग्रहः** | **समस्तपदम्** | **नाम** |
|---|---|---|
| **कुसुमानाम् आवलिः** | **कुसुमावलिः** | **तत्पुरुषः** |
| i. सप्तानां पदानां समाहार: | .................. | .................. |
| ii. परेषाम् उपकार: | .................. | .................. |
| iii. राम: च लक्ष्मण: च | .................. | .................. |
| iv. न पेयम् | .................. | .................. |
| v. धर्म: च अर्थ: च | .................. | .................. |
| vi. काम: च मोक्ष: च | .................. | .................. |
| vii. पञ्चानां वटानां समाहार: | .................. | .................. |
| viii. मातु: गृहे | .................. | .................. |
| ix. न इष्टम् | .................. | .................. |
| x. त्रयाणां भुवनानां समाहार: | .................. | .................. |
| xi. लाभ: च अलाभ: च | .................. | .................. |

© NCERT not to be republished

10

0975CH10

# शब्दरूपाणि

## अकारान्तपुँल्लिङ्गशब्दः —

देव

| विभक्तिः | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | देवः | देवौ | देवाः |
| द्वितीया | देवम् | देवौ | देवान् |
| तृतीया | देवेन | देवाभ्याम् | देवैः |
| चतुर्थी | देवाय | देवाभ्याम् | देवेभ्यः |
| पञ्चमी | देवात् | देवाभ्याम् | देवेभ्यः |
| षष्ठी | देवस्य | देवयोः | देवानाम् |
| सप्तमी | देवे | देवयोः | देवेषु |
| सम्बोधनम् | हे देव! | हे देवौ! | हे देवाः! |

एवमेवान्येषाम् अकारान्तशब्दानां यथा बालक, हंस, मृग, वृक्ष, सागर, राम, नृप, गज, विद्यालय, पुस्तकालय इत्यादीनां शब्दानां रूपाण्यपि भवन्ति।

**अधुना प्रयोगं कुर्मः**

**प्रथमा विभक्तिः**

गजः शनैः चलति।

बालकौ अत्र पठतः।

.................... धावन्ति। (मृग)

**द्वितीया विभक्तिः**

महेशः पाठं पठति।

सोहनः वृक्षौ पश्यति।

रोहितः.................... पूजयति। (देव)

**तृतीया विभक्तिः**

छात्रः कलमेन लिखति

वयं .................... कार्यं कुर्मः (हस्त)

पशवः .................... चलन्ति (पाद)

**चतुर्थी विभक्तिः**

सः पठनाय गच्छति

माला .................... फलानि आनयति (सुत)

सुधा .................... पुस्तकानि नयति। (बालक)

**पञ्चमी विभक्तिः**

घटात् जलं वहति।

....................................................

**षष्ठी विभक्तिः**

रामस्य पिता दशरथः आसीत्।

....................................................

© NCERT not to be republished

| सप्तमी विभक्तिः | सम्बोधनविभक्तिः |
|---|---|
| नकुलः बिले प्रविशति<br>............................................................ | हे छात्र! पुस्तकं पठ<br>............................................................ |

**अकारान्त-नपुंसकलिङ्ग-शब्दः**
**'फल'**

प्रथमा - फलम् फले फलानि
द्वितीया- फलम् फले फलानि
अन्यविभक्तिषु पुँल्लिङ्गवत्।

एवमेव चक्र, पुस्तक, सोपान, क्रीडनकैः, वस्त्र, स्यूत, नेत्र, पुष्प इत्यादिशब्दानां रूपाण्यपि भवन्ति।

**अधुना प्रयोगं कुर्मः।**

| प्रथमा विभक्तिः |
|---|
| फलं पतति |
| पुस्तके स्तः |
| चक्राणि चलन्ति |

| द्वितीया विभक्तिः |
|---|
| सः पुष्पं पश्यति। |
| ............................................................ |

| तृतीया विभक्तिः |
|---|
| वयं नेत्राभ्यां पश्यामः। |
| ............................................................ |
| बालकाः क्रीडनकैः खेलन्ति। |
| ............................................................ |
| ............................................................ |
| सः सोपानेभ्यः अवतरति |

| चतुर्थी विभक्तिः |
|---|
| सः पुस्तकाय पुस्तकालयं गच्छति। |
| ............................................................ |

| षष्ठी विभक्तिः |
|---|
| क्रीडनकस्य वर्णः रक्तः अस्ति। |
| ............................................................ |

| सप्तमी विभक्तिः |
|---|
| पुस्तके चित्राणि सन्ति। |
| ............................................................ |

## आकारान्तस्त्रीलिङ्ग-शब्दः

### रमा

| विभक्तिः | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | रमा | रमे | रमा: |
| द्वितीया | रमाम् | रमे | रमा: |
| तृतीया | रमया | रमाभ्याम् | रमाभि: |
| चतुर्थी | रमायै | रमाभ्याम् | रमाभ्य: |
| पञ्चमी | रमाया: | रमाभ्याम् | रमाभ्य: |
| षष्ठी | रमाया: | रमयो: | रमाणाम् |
| सप्तमी | रमायाम् | रमयो: | रमासु |
| सम्बोधनम् | हे रमे! | हे रमे! | हे रमा:! |

एवमेव गीता, सीता, प्रभा, लतिका, शाखा, नौका, रोटिका, घटिका, माला, आभा इत्यादीनाम् आकारान्तशब्दानां रूपाण्यपि भवन्ति।

**प्रयोग: —**

**प्रथमा विभक्तिः**
बालिका लिखति।
शाखे पतत:
.....................

**द्वितीया विभक्तिः**
राम: सीतां वने अत्यजत्।
स: नौके पश्यति।
.....................

**तृतीया विभक्तिः**
घटिकया समयज्ञानं भवति।
स: कथाभ्याम् मनोरञ्जनं करोति।
.....................

**चतुर्थी विभक्तिः**
स: मालाभ्य: पुष्पाणि चिनोति।
.....................

**पञ्चमी विभक्तिः**
वाटिकाया: पुष्पाणि आनयति।
.....................

**षष्ठी विभक्तिः**
महिलाया: शाटिका सुन्दरीअस्ति।
.....................

**सप्तमी विभक्तिः**
शाखयो: पत्राणि सन्ति।
.....................

**सम्बोधनम्**
हे प्रभो! पुस्तकं पठ।
.....................
.....................



© NCERT not to be republished

## इकारान्तपुँल्लिङ्गशब्दः —
## मुनि

| विभक्तिः | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | मुनिः | मुनी | मुनयः |
| द्वितीया | मुनिम् | मुनी | मुनीन् |
| तृतीया | मुनिना | मुनिभ्याम् | मुनिभिः |
| चतुर्थी | मुनये | मुनिभ्याम् | मुनिभ्यः |
| पञ्चमी | मुनेः | मुनिभ्याम् | मुनिभ्यः |
| षष्ठी | मुनेः | मुन्योः | मुनीनाम् |
| सप्तमी | मुनौ | मुन्योः | मुनिषु |
| सम्बोधनम् | हे मुने! | हे मुनी! | हे मुनयः! |

एवमेव - कपि, हरि, गिरि, विधि, अग्नि, ऋषि, नृपति, कवि, भूपति, वाल्मीकि, इत्यादीनां रूपाणि भवन्ति।

इदानीं प्रयोगं पश्यामः—

**प्रथमा विभक्तिः**

मुनिः वने वसति।

ऋषी तपस्यां कुरुतः

..........................................................

**द्वितीया विभक्तिः**

वृक्षे कपिं पश्य।

..........................................................

..........................................................

**तृतीया विभक्तिः**

कविना मधुरकविता रचिता।

..........................................................

**चतुर्थी विभक्तिः**

भूपतये आसनम् इदम्।

..........................................................

नृपतिभ्यः प्रजाः स्वपुत्रवत् भवितव्याः

**पञ्चमी विभक्तिः**

अग्नेः दूरं तिष्ठ।

..........................................................

**षष्ठी विभक्तिः**

हिमालयः गिरेः नाम अस्ति।

..........................................................

**सप्तमी विभक्तिः**

ऋषिषु तपस्याशक्तिः भवति।

..........................................................

**सम्बोधनम्**

हे विधे! पाहि माम्।

..........................................................





© NCERT not to be republished

**अपवाद:** — अत्र एतदपि ध्यातव्यं यत् सखि, पति-इत्येतयो: इकारान्त- शब्दयो: रूपाणि मुनिशब्दरूपात् पृथक् भवन्ति। परं यदा 'पति' शब्दस्य प्रयोग: समासान्ते भवति, तदा मुनिवत् एव रूपाणि भवन्ति यथा- श्रीपति, भूपति, नृपति, नरपति इत्यादिशब्दानां मुनिवदेव प्रयोग: कृत:। परं यदा पति-शब्द: पृथक्रूपेण भवति तदा तृतीयात: सप्तमीपर्यन्तं एकवचने रूपाणि एवम् भवन्ति —

| **तृ.ए** | **च.ए** | **पं. ष.ए** | **स.** |
|---|---|---|---|
| पत्या | पत्ये | पत्यु: | पत्यौ |

एवमेव सखि (मित्र)

| | | | | |
|---|---|---|---|---|
| प्रथमा | - | सखा | सखायौ | सखाय: |
| द्वितीया | - | सखायम् | सखायौ | सखीन् |
| तृतीयात: सप्तमीपर्यन्तं पतिवत् | | | | |
| सम्बोधनम् | - | सखे | सखायौ | सखाय: |

एतेषाम् अन्यशब्दानां चाऽपि रूपाणि परिशिष्टात् पठित्वा प्रयोगाभ्यासं कुरुत –

**1. निर्देशानुसारं विभक्तिं प्रयुज्य वाक्यपूर्तिं कुरुत —**

i. ग्रीष्मर्तौ ........................ आतप: उष्णतर: भवति। (भानु-षष्ठी)

ii. ग्रामे ........................ गोचारणभूमि: अस्ति।(धेनु-चतुर्थी-बहु.)

iii. ........................ दुग्धम् अतिमधुरं भवति। (धेनु-षष्ठी-एक.)

iv. वसन्तर्तौ ........................ मत्त: पिक: मधुरं कूजति।(मधु-तृतीया-एक.)

v. ........................ बहव: गुणा: भवन्ति। (मधु-सप्तमी-एक.)

vi. मम ........................ सर्वे छात्रा: योग्या: सन्ति। (मति-सप्तमी)

vii. जना: ........................ प्रयोगेण एव कार्यं कर्तुं क्षमा: भवन्ति।(बुद्धि-षष्ठी)

viii. पुत्र: ........................ सह आपणं गच्छति। (पितृ- तृतीया)

ix. राजा दिलीप: प्रजानां पिता आसीत् तासां ........................ केवलं जन्महेतव: आसन्। (पितृ-प्रथमा -बहु.)

**व्यञ्जनान्तशब्दा:**

i. ........................ अजस्य पुत्र: दशरथ: नाम नृप: आसीत्। (राजन्-षष्ठी)

ii. ........................ विनयशीला: भवन्ति। (विद्वस्-प्रथमा बहु.)

iii. ग्रीष्मर्तौ ........................ दर्शनेन शान्तिरनुभूयते।(चन्द्रमस्-षष्ठी)

iv. यथा ........................ तथा चित्ते अपि सत्यता भवेत्। (वाच्-सप्तमी)

© NCERT not to be republished

v. किं ................................ श्रुतं यदस्माभिः कथितम्  (भवत्-तृतीया बहु.)

vi. ................................ प्रतिकूलानि परेषां न समाचरेत्।(आत्मन्-षष्ठी)

vii. ................................ श्रद्धापुष्पाणि अर्पयामि अहम्।  (विद्वस्-चतुर्थी-बहु.)

viii. ................................ बालकाभ्याम् किं पातितं तत्र?  (गच्छत्-तृतीया-द्वि)

ix. मनुष्यः आत्मना एव ................................ उद्धरेत्।  (आत्मन्-द्वितीया-एक.)

x. ................................ प्रजानां रक्षकाः स्युः।  (राजन्-प्रथमा-बहु.)

**सर्वनामशब्दाः**

सर्वनामशब्दाः विशेषणरूपेण एव प्रयुज्यन्ते। अतः लिङ्गम् विभक्तिश्च विशेष्यपदानुसारमेव प्रयुज्यते। एतदाधारेणैव अधःप्रदत्तवाक्येषु रिक्तस्थानानि पूरयत —

i. ................................ज्ञानेन कः लाभः यत् क्रियान्वितं न स्यात्।  (तत्)

ii. ................................ नाटकस्य रचयिता कः ?(इदम्)

iii. भाषणप्रतिस्पर्धायाः पुरस्कारः ................................ बालिकया प्राप्तः? (किम्)

iv. ................................ समारोहे त्वं गमिष्यसि तस्य आयोजनं कुत्र भवति?(यत्)

v. ................................ बालकाः अत्र आगत्य प्रसन्नाः भवन्ति। (सर्व)

vi. ................................ बालिकानां नाम अकारेण प्रारभ्यते ताः अत्र आगच्छन्तु (यत्)

vii. ................................स्यूते अद्य साहित्यस्य पुस्तकं नास्ति। (अस्मद्-षष्ठी-एक.)

viii. ................................ एतत् कार्यं किमर्थं न कृतम्?  (युष्मद्-तृतीया-बहु.)

ix. ................................ प्रयोगशालायां कः प्रयोगः क्रियते?(तत्)

x. ................................ कथायाः रचयिता कः?  (इदम्)

**संख्यापदानि**

| **पुँल्लिङ्गे** | **स्त्रीलिङ्गे** | **नपुंसकलिङ्गे** |
|---|---|---|
| एक पेड़ | एक बेल | एक फल |
| एकः वृक्षः | एका लता | एकं फलम् |
| दो पेड़ | दो बेल | दो फल |
| द्वौ वृक्षौ | द्वे लते | द्वे फले |
| तीन पेड़ | तीन बेल | तीन फल |

| | | |
|---|---|---|
| त्रय: वृक्षा: | तिस्र: लता: | त्रीणि फलानि |
| चार पेड़ | चार बेल | चार फल |
| चत्वार: वृक्षा: | चतस्र: लता: | चत्वारि फलानि |

* एकत: चतु:पर्यन्तानि सङ्ख्यापदानि त्रिषु लिङ्गेषु भिन्नानि भवन्ति पञ्चत: च शतंपर्यन्तं समानानि भवन्ति।
* एकत: दश-पर्यन्तं सङ्ख्यापदानां प्रयोग: सर्वासु विभक्तिषु भवति।

**एक (एकवचने)**

| **विभक्ति:** | **पुँल्लिङ्गे** | **स्त्रीलिङ्गे** | **नपुंसकलिङ्गे** |
|---|---|---|---|
| प्रथमा | एक: | एका | एकम् |
| द्वितीया | एकम् | एकाम् | एकम् |
| तृतीया | एकेन | एकया | एकेन |
| चतुर्थी | एकस्मै | एकस्यै | एकस्मै |
| पञ्चमी | एकस्मात् | एकस्या: | एकस्मात् |
| षष्ठी | एकस्य | एकस्या: | एकस्य |
| सप्तमी | एकस्मिन् | एकस्याम् | एकस्मिन् |

**द्वि (द्विवचने)**

| **विभक्ति:** | **पुँल्लिङ्गे** | **स्त्रीलिङ्गे** | **नपुंसकलिङ्गे** |
|---|---|---|---|
| प्रथमा | द्वौ | द्वे | द्वे |
| द्वितीया | द्वौ | द्वे | द्वे |
| तृतीया | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| चतुर्थी | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| पञ्चमी | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| षष्ठी | द्वयो: | द्वयो: | द्वयो: |
| सप्तमी | द्वयो: | द्वयो: | द्वयो: |

**त्रि (बहुवचने)**

| **विभक्ति:** | **पुँल्लिङ्गे** | **स्त्रीलिङ्गे** | **नपुंसकलिङ्गे** |
|---|---|---|---|
| प्रथमा | त्रय: | तिस्र: | त्रीणि |
| द्वितीया | त्रीन् | तिस्र: | त्रीणि |
| तृतीया | त्रिभि: | तिसृभि: | त्रिभि: |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| चतुर्थी | त्रिभ्य: | तिसृभ्य: | त्रिभ्य: |
| पञ्चमी | त्रिभ्य: | तिसृभ्य: | त्रिभ्य: |
| षष्ठी | त्रयाणाम् | तिसृणाम् | त्रयाणाम् |
| सप्तमी | त्रिषु | तिसृषु | त्रिषु |

**चतुर् (बहुवचने)**

| विभक्ति: | पुँल्लिङ्गे | स्त्रीलिङ्गे | नपुसंकलिङ्गे |
|---|---|---|---|
| प्रथमा | चत्वार: | चतस्र: | चत्वारि |
| द्वितीया | चतुर: | चतस्र: | चत्वारि |
| तृतीया | चतुर्भि: | चतसृभि: | चतुर्भि: |
| चतुर्थी | चतुर्भ्य: | चतसृभ्य: | चतुर्भ्य: |
| पञ्चमी | चतुर्भ्य: | चतसृभ्य: | चतुर्भ्य: |
| षष्ठी | चतुर्णाम् | चतसृणाम् | चतुर्णाम् |
| सप्तमी | चतुर्षु | चतसृषु | चतुर्षु |

**पञ्चत: दश-पर्यन्तं शब्दरूपाणि (सर्वेषु लिङ्गेषु समानानि)**

| विभक्ति: | पञ्चन् | षष् | सप्तन् | अष्टन् | नवन् | दशन् |
|---|---|---|---|---|---|---|
| प्रथमा | पञ्च | षट् | सप्त | अष्ट | नव | दश |
| द्वितीया | पञ्च | षट् | सप्त | अष्ट | नव | दश |
| तृतीया | पञ्चभि: | षड्भि: | सप्तभि: | अष्टभि: | नवभि: | दशभि: |
| चतुर्थी | पञ्चभ्य: | षड्भ्य: | सप्तभ्य: | अष्टभ्य: | नवभ्य: | दशभ्य: |
| पञ्चमी | पञ्चभ्य: | षड्भ्य: | सप्तभ्य: | अष्टभ्य: | नवभ्य: | दशभ्य: |
| षष्ठी | पञ्चानाम् | षण्णाम् | सप्तानाम् | अष्टानाम् | नवानाम् | दशानाम् |
| सप्तमी | पञ्चसु | षट्सु | सप्तसु | अष्टसु | नवसु | दशसु |

**एकादशत: पञ्चाशत्-पर्यन्तं संख्यापदानि**

| | | | |
|---|---|---|---|
| 11 एकादश | 21 एकविंशति: | 31 एकत्रिंशत् | 41 एकचत्वारिंशत् |
| 12 द्वादश | 22 द्वाविंशति: | 32 द्वात्रिंशत् | 42 द्विचत्वारिंशत् |
| 13 त्रयोदश | 23 त्रयोविंशति: | 33 त्रयस्त्रिंशत् | 43 त्रयश्चत्वारिंशत् |
| 14 चतुर्दश | 24 चतुर्विंशति: | 34 चतुस्त्रिंशत् | 44 चतुश्चत्वारिंशत् |
| 15 पञ्चदश | 25 पञ्चविंशति: | 35 पञ्चत्रिंशत् | 45 पञ्चचत्वारिंशत् |
| 16 षोडश | 26 षड्विंशति: | 36 षट्त्रिंशत् | 46 षट्चत्वारिंशत् |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| 17 सप्तदश | 27 सप्तविंशति: | 37 सप्तत्रिंशत् | 47 सप्तचत्वारिंशत् |
| 18 अष्टादश | 28 अष्टाविंशति: | 38 अष्टात्रिंशत् | 48 अष्टचत्वारिंशत् |
| 19 नवदश/ एकोनविंशति: | 29 नवविंशति:/ एकोनत्रिंशत् | 39 नवत्रिंशत्/ एकोनचत्वारिंशत् | 49 नवचत्वारिंशत्/ एकोनपञ्चाशत् |
| 20 विंशति: | 30 त्रिंशत् | 40 चत्वारिंशत् | 50 पञ्चाशत् |

**1. उचितै: संख्यापदै: रिक्तस्थानानि पूर्यन्ताम् —**

i. अहम् .................. (2) नेत्राभ्याम् पश्यामि।

ii. .................. (1) पात्रे .................. (9) फलानां रस: वर्तते?

iii. .................. (10) आननानि यस्य, स: दशानन: कथ्यते।

iv. मईमासे ..................(31) दिवसा: भवन्ति।

v. विद्यालयस्य वार्षिकोत्सव: .................. (24) तारिकायां भविष्यति।

vi. .................. (50) अर्धशतकमपि कथ्यते।

vii. वेधशालाया: निर्माणम् .................. (18) शताब्द्याम् अभवत्।

viii. .................. (4) वृक्षेभ्य: ..................(47) पत्राणि अपतन्।

ix. चर्चायाम् .................. (33) विद्वांस: भागं गृहीतवन्त:

**2. शुद्धं विकल्पं गोलाकारं कुरुत —**

**यथा—विशन्ति: (विंशति:) विन्शति:**

| | | | |
|---|---|---|---|
| i. | एकदश | एकेदश | एकादश |
| ii. | द्वात्रिंशत् | द्वत्रिंशत् | द्वात्रींशत् |
| iii. | षोदश | षोडदश | षोडश |
| iv. | चत्वारींशत् | चत्वारिंशत् | चत्वारंशत् |
| v. | अष्ट | अष्ट: | अष्टा: |
| vi. | त्रय:विंशति: | त्रिविंशति: | त्रयोविंशति: |
| vii. | चतुर्दश | चर्तुदश | चतुरदश |

**3. उचितेन विकल्पेन रिक्तस्थानानि पूरयत —**

i. वृक्षे .................. (2) काकौ स्त: (द्वि/द्वौ/द्वे)

ii. उद्याने .................. (4) महिला: भ्रमन्ति। (चत्वार:/चतुरै:/चतस्र:)



© NCERT not to be republished

iii. गज: ................................(4) पादै: चलति। (चतुर्भि:/चतुरै:/चतुर्भ्य:)

iv. ................................ (1) शाखायां खगा: कूजन्ति। (एकस्मिन्/एके/एकस्याम्)

v. बालका: ................................ (3) फलानि खादन्ति। (त्रीणि/त्रय:/तिस्र:)

vi. एतेषां ................................ (6) वृक्षाणां नामानि वदत। (षट्/षण्णाम्/षट्नाम्)

vii. पाण्डवा: ................................ आसन्। (पञ्च:, पञ्चा:, पञ्च)

**4. (अ) प्रदत्तसंख्यापदानि आरोहक्रमेण लिखत —**

**एकविंशति:, दश, सप्तत्रिंशत्, एकादश, नवचत्वारिंशत्, पञ्चविंशति:, षट्चत्वारिंशत्, सप्तदश, षट्, द्वात्रिंशत्।**

................................ ................................ ................................

................................ ................................ ................................

................................ ................................ ................................

................................ ................................ ................................

**(आ) प्रदत्तसंख्यापदानि अवरोहक्रमेण लिखत —**

**नवदश, षट्त्रिंशत्, सप्त, चतुर्विंशति:, पञ्चाशत्, चत्वार:, द्विचत्वारिंशत्, अष्टाविंशति:, पञ्चचत्वारिंशत्, त्रयोदश**

................................ ................................ ................................

................................ ................................ ................................

................................ ................................ ................................

................................ ................................ ................................

**5. ध्यानेन चिन्तयित्वा वदत लिखत च–**

i. मम समीपे नवचत्वारिंशत् फलानि सन्ति।

**त्रयोदश फलानि मया वितीर्णानि कति अवशिष्टानि?**

................................................................................................

ii. एकस्य आम्रस्य मूल्यं पञ्चरूप्यकाणि अस्ति। मया अष्ट आम्राणि क्रीतानि। मया कियत् मूल्यं दातव्यम् वर्तते?

................................................................................................



© NCERT not to be republished

iii. सुधीरस्य समीपे दश रूप्यकाणि आसन्। तस्य माता तस्मै चतुर्विंशतिं रूप्यकाणि दत्वा शाकम् आनेतुं प्रैषयत्। स: षड्विंशत्या: रूप्यकै: शाकम् आनीतवान्। कति रूप्यकाणि अवशिष्टानि?

..........................................................................................................................

iv. सुधाया: जन्मदिवस: आसीत्। तस्या: माता तस्मै पञ्चाशत् चॉकलेहान् (Chocolate) कक्षायां वितरणाय अयच्छत्। कक्षायां सप्तत्रिंशत् छात्रा: उपस्थिता: आसन्। तया कति 'चॉकलेहा:' वितीर्णा: कति च अवशिष्टा:?

..........................................................................................................................

v. विजयस्य समीपे द्विचत्वारिंशत् लेखन्य: आसन्। स: प्रतिच्छात्रं द्वे-लेखिन्यौ वितरितुम् इच्छति। स: कति-छात्रेभ्य: लेखिनी: प्रदास्यति येन किमपि अवशिष्टं न भवेत्।

..........................................................................................................................

## कानिचन उपयोगीनि शब्दरूपाणि

### नदी (ईकारान्तशब्द:)

| विभक्ति: | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | नदी | नद्यौ | नद्य: |
| द्वितीया | नदीम् | नद्यौ | नदी: |
| तृतीया | नद्या | नदीभ्याम् | नदीभि: |
| चतुर्थी | नद्यै | नदीभ्याम् | नदीभ्य: |
| पञ्चमी | नद्या: | नदीभ्याम् | नदीभ्य: |
| षष्ठी | नद्या: | नद्यो: | नदीनाम् |
| सप्तमी | नद्याम् | नद्यो: | नदीषु |
| सम्बोधनम् | हे नदि! | हे नद्यौ! | हे नद्य:! |

एवमेव लक्ष्मी, वाणी, रसवती, भगिनी, पुत्री, नगरी, जननी, सरस्वती, गृहिणी, लेखनी इत्यादीनां रूपाण्यपि भवन्ति।

### भानु (उकारान्त पुँल्लिङ्ग शब्द:)

| विभक्ति: | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | भानु: | भानू | भानव: |
| द्वितीया | भानुम् | भानू | भानून् |

| | | | |
|---|---|---|---|
| तृतीया | भानुना | भानुभ्याम् | भानुभि: |
| चतुर्थी | भानवे | भानुभ्याम् | भानुभ्य: |
| पञ्चमी | भानो: | भानुभ्याम् | भानुभ्य: |
| षष्ठी | भानो: | भान्वो: | भानूनाम् |
| सप्तमी | भानौ | भान्वो: | भानुषु |
| सम्बोधनम् | हे भानो! | हे भानू! | हे भानव:! |

एवमेव सूनु (पुत्र), कृशानु (आग), चञ्चु (चोंच), इत्यादीनां शब्दानां रूपाण्यपि भवन्ति।

**धेनु (उकारान्त स्त्रीलिङ्ग)**

| **विभक्ति:** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा | धेनु: | धेनू | धेनव: |
| द्वितीया | धेनुम् | धेनू | धेनू: |
| तृतीया | धेन्वा | धेनुभ्याम् | धेनुभि: |
| चतुर्थी | धेनवे/धेन्वै | धेनुभ्याम् | धेनुभ्य: |
| पञ्चमी | धेनो:/धेन्वा: | धेनुभ्याम् | धेनुभ्य: |
| षष्ठी | धेनो:/धेन्वा: | धेन्वो: | धेनूनाम् |
| सप्तमी | धेनौ/धेन्वाम्: | धेन्वो: | धेनुषु |
| सम्बोधनम् | हे धेनो! | हे धेनू! | हे धेनव:! |

**मधु (उकारान्त नपुंसकलिङ्ग)**

| **विभक्ति:** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा | मधु | मधुनी | मधूनि |
| द्वितीया | मधु | मधुनी | मधूनि |
| तृतीया | मधुना | मधुभ्याम् | मधुभि: |
| चतुर्थी | मधुने | मधुभ्याम् | मधुभ्य: |
| पञ्चमी | मधुन: | मधाुभ्याम् | मधुभ्य: |
| षष्ठी | मधुन: | मधुनो: | मधूनाम् |
| सप्तमी | मधुनि | मधुनो: | मधुषु |
| सम्बोधनम् | हे मधु/मधो | हे मधुनी! | हे मधूनि! |

एवमेव अश्रु (आँसू), अम्बु (जल), श्मश्रु (दाढ़ी) वस्तु, वसु (धन) लघु इत्यादीनां शब्दानां रूपाण्यपि भवन्ति।

© NCERT not to be republished

## पितृ (ऋकारान्त पुँल्लिङ्ग)

| विभक्तिः | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| द्वितीया | पितरम् | पितरौ | पितॄन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |
| सम्बोधनम् | हे पितः! | हे पितरौ! | हे पितरः! |

एवमेव जामातृ, भ्रातृ, देवृ (देवर) इत्यादि - शब्दानां रूपाण्यपि भवन्ति। दातृ, कर्तृ, धातृ, नेतृ, श्रोतृ, सवितृ, भर्तृ, द्रष्ट्र (देखने वाला) इत्यादिशब्दानां रूपाण्यपि एवमेव भवन्ति। केवलं प्रथमा, द्वितीया, संबोधने च द्विवचनान्तरूपं पितरौ इति प्रकारेण न अपितु दातारौ, कर्तारौ, वक्तारौ....इत्यादिप्रकारेण भवति।

## मातृ (माँ, माता) (ऋकारान्त स्त्रीलिङ्ग)

| विभक्तिः | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | माता | मातरौ | मातरः |
| द्वितीया | मातरम् | मातरौ | मातॄः |
| तृतीया | मात्रा | मातृभ्याम् | मातृभिः |
| चतुर्थी | मात्रे | मातृभ्याम् | मातृभ्यः |
| पञ्चमी | मातुः | मातृभ्याम् | मातृभ्यः |
| षष्ठी | मातुः | मात्रोः | मातॄणाम् |
| सप्तमी | मातरि | मात्रोः | मातृषु |
| सम्बोधनम् | हे मातः! | हे मातरौ | हे मातरः! |

एवमेव दुहितृ, (पुत्री) यातृ (देवरानी या जेठानी), ननान्दृ (ननद) इत्यादीनां शब्दानां रूपाण्यपि भवन्ति। मूलतः ऋकारान्त-स्त्रीलिङ्गे, पुँल्लिङ्गे च केवलं द्वितीया-बहुवचनमेव मातॄः, दुहितॄः इत्यादिप्रकारेण प्रयुज्यते अन्यत् सर्वं तु समानमेव वर्तते।



© NCERT not to be republished

### राजन् (राजा) (नकारान्त पुँल्लिङ्ग)

| विभक्ति: | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | राजा | राजानौ | राजान: |
| द्वितीया | राजानम् | राजानौ | राज्ञ: |
| तृतीया | राज्ञा | राजभ्याम् | राजभि: |
| चतुर्थी | राज्ञे | राजभ्याम् | राजभ्य: |
| पञ्चमी | राज्ञ: | राजभ्याम् | राजभ्य: |
| षष्ठी | राज्ञ: | राज्ञो: | राज्ञाम् |
| सप्तमी | राज्ञि/राजनि | राज्ञो: | राजसु |
| सम्बोधनम् | हे राजन्! | हे राजानौ! | हे राजान:! |

### भवत् (आप) (पुँल्लिङ्ग)

| विभक्ति: | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | भवान् | भवन्तौ | भवन्त: |
| द्वितीया | भवन्तम् | भवन्तौ | भवत: |
| तृतीया | भवता | भवद्भ्याम् | भवद्भि: |
| चतुर्थी | भवते | भवद्भ्याम् | भवद्भ्य: |
| पञ्चमी | भवत: | भवद्भ्याम् | भवद्भ्य: |
| षष्ठी | भवत: | भवतो: | भवताम् |
| सप्तमी | भवति | भवतो: | भवत्सु |

### आत्मन् (आत्मा, अपने आप) (पुँल्लिङ्ग)

| विभक्ति: | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | आत्मा | आत्मानौ | आत्मान: |
| द्वितीया | आत्मानम् | आत्मानौ | आत्मन: |
| तृतीया | आत्मना | आत्मभ्याम् | आत्मभि: |
| चतुर्थी | आत्मने | आत्मभ्याम् | आत्मभ्य: |
| पञ्चमी | आत्मन: | आत्मभ्याम् | आत्मभ्य: |
| षष्ठी | आत्मन: | आत्मनो: | आत्मनाम् |
| सप्तमी | आत्मनि | आत्मनो: | आत्मसु |
| सम्बोधनम् | हे आत्मन्! | हे आत्मानौ! | हे आत्मान:! |



© NCERT not to be republished

### विद्वस् (विद्वान्) (पुँल्लिङ्ग)

| विभक्तिः | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | विद्वान् | विद्वांसौ | विद्वांसः |
| द्वितीया | विद्वांसम् | विद्वांसौ | विदुषः |
| तृतीया | विदुषा | विद्वद्भ्याम् | विद्वद्भिः |
| चतुर्थी | विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः |
| पञ्चमी | विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः |
| षष्ठी | विदुषः | विदुषोः | विदुषाम् |
| सप्तमी | विदुषि | विदुषोः | विद्वत्सु |
| सम्बोधनम् | हे विद्वन्! | हे विद्वांसौ! | हे विद्वांसः! |

### चन्द्रमस् (चन्दमा) (पुँल्लिङ्ग)

| विभक्तिः | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | चन्द्रमाः | चन्द्रमसौ | चन्द्रमसः |
| द्वितीया | चन्द्रमसम् | चन्द्रमसौ | चन्द्रमसः |
| तृतीया | चन्द्रमसा | चन्द्रमोभ्याम् | चन्द्रमोभिः |
| चतुर्थी | चन्द्रमसे | चन्द्रमोभ्याम् | चन्द्रमोभ्यः |
| पञ्चमी | चन्द्रमसः | चन्द्रमोभ्याम् | चन्द्रमोभ्यः |
| षष्ठी | चन्द्रमसः | चन्द्रमसोः | चन्द्रमसाम् |
| सप्तमी | चन्द्रमसि | चन्द्रमसोः | चन्द्रमस्सु |
| सम्बोधनम् | हे चन्द्रमः! | हे चन्द्रमसौ! | हे चन्द्रमसः! |

### वाच् (चकारान्त स्त्रीलिङ्ग)

| विभक्तिः | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | वाक्, वाग् | वाचौ | वाचः |
| द्वितीया | वाचम् | वाचौ | वाचः |
| तृतीया | वाचा | वाग्भ्याम् | वाग्भिः |
| चतुर्थी | वाचे | वाग्भ्याम् | वाग्भ्यः |
| पञ्चमी | वाचः | वाग्भ्याम् | वाग्भ्यः |
| षष्ठी | वाचः | वाचोः | वाचाम् |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| सप्तमी | वाचि | वाचो: | वाक्षु |
| सम्बोधनम् | हे वाक्, वाग्! | हे वाचौ! | हे वाच:! |

**गच्छत् (तकारान्त पुँल्लिङ्ग)**

| **विभक्ति:** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा | गच्छन् | गच्छन्तौ | गच्छन्त: |
| द्वितीया | गच्छन्तम् | गच्छन्तौ | गच्छत: |
| तृतीया | गच्छता | गच्छद्भ्याम् | गच्छद्भि: |
| चतुर्थी | गच्छते | गच्छद्भ्याम् | गच्छद्भ्य: |
| पञ्चमी | गच्छत: | गच्छद्भ्याम् | गच्छद्भ्य: |
| षष्ठी | गच्छत: | गच्छतो: | गच्छताम् |
| सप्तमी | गच्छति | गच्छतो: | गच्छत्सु |
| सम्बोधनम् | हे गच्छन्! | हे गच्छन्तौ! | हे गच्छन्त:! |

**सर्व (सब) (पुँल्लिङ्ग)**

| **विभक्ति:** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा | सर्व: | सर्वौ | सर्वे |
| द्वितीया | सर्वम् | सर्वौ | सर्वान् |
| तृतीया | सर्वेण | सर्वाभ्याम् | सर्वै: |
| चतुर्थी | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्य: |
| पञ्चमी | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्य: |
| षष्ठी | सर्वस्य | सर्वयो: | सर्वेषाम् |
| सप्तमी | सर्वस्मिन् | सर्वयो: | सर्वेषु |

**सर्व (सब) (स्त्रीलिङ्ग)**

| **विभक्ति:** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा | सर्वा | सर्वे | सर्वा: |
| द्वितीया | सर्वाम् | सर्वे | सर्वा: |
| तृतीया | सर्वया | सर्वाभ्याम् | सर्वाभि: |
| चतुर्थी | सर्वस्यै | सर्वाभ्याम् | सर्वाभ्य: |
| पञ्चमी | सर्वस्या: | सर्वाभ्याम् | सर्वाभ्य: |
| षष्ठी | सर्वस्या: | सर्वयो: | सर्वासाम् |
| सप्तमी | सर्वस्याम् | सर्वयो: | सर्वासु |

### सर्व (सब) (नपुंसकलिङ्ग)

| **विभक्ति:** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा | सर्वम् | सर्वे | सर्वाणि |
| द्वितीया | सर्वम् | सर्वे | सर्वाणि |

(तृतीया से सप्तमी पर्यन्त शेष रूप पुँल्लिङ्ग के समान चलेंगे। सर्वनाम शब्दों का सम्बोधन नहीं होता।)

### यत् (जो) (पुँल्लिङ्ग)

| **विभक्ति:** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा | य: | यौ | ये |
| द्वितीया | यम् | यौ | यान् |
| तृतीया | येन | याभ्याम् | यै: |
| चतुर्थी | यस्मै | याभ्याम् | येभ्य: |
| पञ्चमी | यस्मात् | याभ्याम् | येभ्य: |
| षष्ठी | यस्य | ययो: | येषाम् |
| सप्तमी | यस्मिन् | ययो: | येषु |

### यत् (सब) (स्त्रीलिङ्ग)

| **विभक्ति:** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा | या | ये | या: |
| द्वितीया | याम् | ये | या: |
| तृतीया | यया | याभ्याम् | याभि: |
| चतुर्थी | यस्यै | याभ्याम् | याभ्य: |
| पञ्चमी | यस्या: | याभ्याम् | याभ्य: |
| षष्ठी | यस्या: | ययो: | यासाम् |
| सप्तमी | यस्याम् | ययो: | यासु |

### यत् (जो) (नपुंसकलिङ्ग)

| **विभक्ति:** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा | यत् | ये | यानि |
| द्वितीया | यत् | ये | यानि |

(तृतीया से सप्तमी पर्यन्त शेष रूप पुँल्लिङ्ग के समान होते हैं।)



© NCERT not to be republished

### एतत् (यह) (पुँलिङ्ग)

| विभक्तिः | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | एष: | एतौ | एते |
| द्वितीया | एतम् | एतौ | एतान् |
| तृतीया | एतेन | एताभ्याम् | एतै: |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्य: |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्य: |
| षष्ठी | एतस्य | एतयो: | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयो: | एतेषु |

### एतत् (यह) (नपुंसकलिङ्ग)

| विभक्तिः | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | एतत् | एते | एतानि |
| द्वितीया | एतत् | एते | एतानि |

(शेष रूप पुँल्लिङ्ग के समान होते हैं।)

### एतत् (यह) (स्त्रीलिङ्ग)

| विभक्तिः | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | एषा | एते | एता: |
| द्वितीया | एताम् | एते | एता: |
| तृतीया | एतया | एताभ्याम् | एताभि: |
| चतुर्थी | एतस्यै | एताभ्याम् | एताभ्य: |
| पञ्चमी | एतस्या: | एताभ्याम् | एताभ्य: |
| षष्ठी | एतस्या: | एतयो: | एतासाम् |
| सप्तमी | एतस्याम् | एतयो: | एतासु |

### तत् (वह) (पुँलिङ्ग)

| विभक्तिः | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | स: | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तै: |



© NCERT not to be republished

| | | | |
|---|---|---|---|
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्य: |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्य: |
| षष्ठी | तस्य | तयो: | तेषाम् |
| सप्तमी | तस्मिन् | तयो: | तेषु |

(तत्, यत्, एतत्, इदम्, अदस्, युष्मद्, अस्मद् आदि सर्वनाम शब्दों का सम्बोधन नहीं होता)

### तत् (वह) (स्त्रीलिङ्ग)

| **विभक्ति:** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा | सा | ते | ता: |
| द्वितीया | ताम् | ते | ता: |
| तृतीया | तया | ताभ्याम् | ताभि: |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्य: |
| पञ्चमी | तस्या: | ताभ्याम् | ताभ्य: |
| षष्ठी | तस्या: | तयो: | तासाम् |
| सप्तमी | तस्याम् | तयो: | तासु |

### तत् (वह) (नपुंसकलिङ्ग)

| **विभक्ति:** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा | तत् | ते | तानि |
| द्वितीया | तत् | ते | तानि |

(शेष रूप पुँल्लिङ्ग के समान होते हैं)

### किम् (कौन) (पुँल्लिङ्ग)

| **विभक्ति:** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा | क: | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कै: |
| चतुर्थी | कस्मै | काभ्याम् | केभ्य: |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्य: |
| षष्ठी | कस्य | कयो: | केषाम् |
| सप्तमी | कस्मिन् | कयो: | केषु |



© NCERT not to be republished

### किम् (कौन) (स्त्रीलिङ्ग)

| विभक्ति: | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | का | के | का: |
| द्वितीया | काम् | के | का: |
| तृतीया | कया | काभ्याम् | काभि: |
| चतुर्थी | कस्यै | काभ्याम् | काभ्य: |
| पञ्चमी | कस्या: | काभ्याम् | काभ्य: |
| षष्ठी | कस्या: | कयो: | कासाम् |
| सप्तमी | कस्याम् | कयो: | कासु |

### किम् (नपुंसकलिङ्ग)

| विभक्ति: | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |

(शेष रूप पुँल्लिङ्ग के समान होंगे)

### इदम् (यह) (पुँल्लिङ्ग)

| विभक्ति: | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | अयम् | इमौ | इमे |
| द्वितीया | इमम्, एनम् | इमौ, एनौ | इमान्, एनान् |
| तृतीया | अनेन, एनेन | आभ्याम् | एभि: |
| चतुर्थी | अस्मै | आभ्याम् | एभ्य: |
| पञ्चमी | अस्मात् | आभ्याम् | एभ्य: |
| षष्ठी | अस्य | अनयो:/एनयो: | एषाम् |
| सप्तमी | अस्मिन् | अनयो:/एनयो: | एषु |

### इदम् (यह) (स्त्रीलिंग)

| विभक्ति: | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | इयम् | इमे | इमा: |
| द्वितीया | इमाम् | इमे | इमा: |
| तृतीया | अनया | आभ्याम् | आभि: |
| चतुर्थी | अस्यै | आभ्याम् | आभ्य: |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| पञ्चमी | अस्याः | आभ्याम् | आभ्यः |
| षष्ठी | अस्याः | अनयोः | आसाम् |
| सप्तमी | अस्याम् | अनयोः | आसु |

**इदम् (यह) (नपुंसकलिङ्ग)**

| **विभक्तिः** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा | इदम् | इमे | इमानि |
| द्वितीया | इदम् | इमे | इमानि |

(इसके शेष रूप पुँल्लिङ्ग के समान होते हैं)

**अस्मद् (मैं)**

| **विभक्तिः** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम्, मा | आवाम्, नौ | अस्मान्, नः |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम्, मे | आवाभ्याम्, नौ | अस्मभ्यम्, नः |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम, मे | आवयोः, नौ | अस्माकम्, नः |
| सप्तमी | मयि | आवयोः | अस्मासु |

**युष्मद् (तुम)**

| **विभक्तिः** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम्, त्वा | युवाम्, वाम् | युष्मान्, वः |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम्, ते | युवाभ्याम्, वाम् | युष्मभ्यम्, वः |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव, ते | युवयोः, वाम् | युष्माकम्, वः |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

© NCERT not to be republished

11

0975CH11

# धातुरूपाणि

संस्कृतभाषायां क्रियार्थं धातुरूपाणां प्रयोग: भवति। धातुरूपेषु पञ्चलकाराणां मुख्यत: प्रयोग: भवति। यथा —

**लट्लकार:**

**(वर्तमानकाले)**



**जन: चलदूरभाषे चित्राणि पश्यति।**

**लङ्लकार:**

**(भूतकाले)**



**ह्य: त्वं कुत्र आसी:?**

**लृट्लकार:**

**(भविष्यत्काले)**



**श्व: आवाम् आपणं चलिष्याव:।**

**लोट्लकार:**

**(आज्ञार्थे)**



**अत्र मा तिष्ठ।**

© NCERT not to be republished

## विधिलिङ्लकार

**(संभावनार्थे)**



**संभवत: अद्य वर्षा भवेत्।**

प्रत्येकं लकारे त्रय: पुरुषा: त्रीणि वचनानि च भवन्ति। अधुना वयं लट्लकारस्य माध्यमेन कर्तृ-क्रिया-अन्वितिं प्रदर्शयन्तीम् इमाम् तालिकाम् अवगच्छाम:-

**लट्लकार: (पठ् धातु)**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथम: पुरुष:** | पठति | पठत: | पठन्ति |
| **(कर्तृपदम्)** | (स:,सा,तत्) | (तौ,ते,ते) | (ते,ता:,तानि) |
| **मध्यम: पुरुष:** | पठसि | पठथ: | पठथ |
| **(कर्तृपदम्)** | (त्वम्) | (युवाम्) | (यूयम्) |
| **उत्तम: पुरुष:** | पठामि | पठाव: | पठाम: |
| **(कर्तृपदम्)** | (अहम्) | (आवाम्) | (वयम्) |

एवमेव सर्वाषु धातुषु सर्वेषु लकारेषु च क्रियाया: (धातुरूपाणां) प्रयोग: भवति।

**1. कोष्ठके प्रदत्त-धातूनाम् उचितै: रूपै: रिक्तस्थानानि पूरयत —**

i. ये छात्रा: कक्षायां ध्यानेन पाठं .................................. (श्रु, लट्), ते अभीष्टं परिणामं .................................. (लभ्, लट्)।

ii. भो छात्रा:! जंक इति भोज्यवस्तूनि तु कदापि मा .................................. (भक्ष्, लोट्)

iii. अनुशासनबद्ध: बाल: यथाकालं सर्वं कार्यं कर्तुं ..................................। (शक्, लट्)

iv. पुत्र! .................................. (दृश्, लोट्) स्वलेखम्। त्वं ध्यानेन सुलेखं ..................................। (लिख्, लोट्)



2021–22

v. पित:! अद्याहम् ध्यानेन लिखित्वा भवते ..........................। (दृश्, लृट्)

vi. रमा आश्रमे पुष्पाणि ..........................। (चि, लट्)

vii. यदि अहम् एतत् कार्यं कुर्याम् तर्हि कमुपहारं ..........................? (लभ्, लृट्)

viii. ये जना: यत्किमपि अखाद्यम् .......................... (भक्ष्, लट्) ते प्राय: अस्वस्था: .................... (भू, लट्)

ix. भो बाला:! कमपि प्राणिनं मा .......................... (तुद्, लोट्)

x. भवान् किं सत्यं .......................... (ब्रू, लट्)

**2. रेलदुर्घटनाया: विषये प्रकाशितेऽस्मिन् समाचारपत्रे धातुरूपाणाम् अशुद्धय: सञ्जाता:। एतत् समाचारपत्रं पठित्वा क्रियापदानि शुद्धानि कुरुत–**

**यथा –**

**ह्य: अहम् समाचार-पत्रे <u>पठामि</u> अपठम् यत् रेलदुर्घटनायाम् अनेके जना: आहता:।**

i. केचन जना: तान् असेवन् परम् दु:खस्य ..........................

ii. विषय: एष: सन्ति यत् केचित् दुर्जना: तेषां ..........................

iii. धनस्यूतम् अचोरय: येन अनेकेषां तु ..........................

iv. परिचयपत्रमपि न अमिलत्। इतोऽपि ..........................

v. अधिकं यत् तेषां दु:खेन संवेदनहीना: ..........................

vi. जना: तु केवलं स्वचलदूरभाषयन्त्रेण तस्या: ..........................

vii. घटनाया: वीडियो-निर्माणे संलग्ना: सन्ति। ..........................

**3. उचित-धातुरूपेण रिक्तस्थानानि पूरयत —**

i. न कोऽपि जानाति श्व: किम् .......................... ? (भू)

ii. ह्य: त्वम् आपणात् किं .......................... (क्री)

iii. आगामिवर्षे अहम् विदेशम् ..........................। (गम्)

iv. अधुना त्वं किं ..........................। (पच्)

v. गतदिवसे अहम् एतत् पुस्तकम् ..........................। (इष्)

vi. परश्व: अहम् तव गृहे ..........................। (स्था)

© NCERT not to be republished

**4. प्रदत्तैः पदैः वाक्यानि रचयत–**

i. सिञ्चति ..............................

ii. पठेयुः ..............................

iii. कथयानि ..............................

iv. पिबाव ..............................

v. सेवामहे ..............................

vi. आसन् ..............................

vii. लेखिष्यसि ..............................

viii. अपश्यः ..............................

ix. लभन्ते ..............................

x. अस्ति ..............................

© NCERT
not to be republished

12

0975CH12

# वर्णविचारः

इदानीं यावत् भवद्भिः संस्कृतभाषायाः वर्णानां ज्ञानं तु प्राप्तमेव। अतः सर्वप्रथमं वयमेतेषां संयोजनविच्छेदयोः अभ्यासं कुर्मः तद्यथा —

| | | |
|---|---|---|
| व्+अ+र्+ण्+अ+व्+इ+च्+आ+र्+अः | – | **वर्णविचारः** |
| क्+आ+र्+य्+अ+द्+अ+क्+ष्+अ+त्+आः | – | **कार्यदक्षताः** |
| प्+र्+इ+य्+अ+व्+आ+द्+इ+त्+आ | – | **प्रियवादिता** |
| ज्+ञ्+आ+न्+अ+प्+र्+आ+प्+त्+इः | – | **ज्ञानप्राप्तिः** |

**1. एवमेव एतेषां पदानामपि संयोजनं कुरुत —**

i. स्+ऊ+क्+त्+इ+स्+औ+र्+अ+भ्+अ+म् – ..............................

ii. प्+र्+अ+त्+य्+आ+ह्+आ+र्+अः – ..............................

iii. अ+न्+उ+द्+आ+त्+त्+अः – ..............................

iv. इ+क्+ष्+उ+द्+अ+ण्+ड्+अ+म् – ..............................

v. म्+अ+ञ्+ज्+ऊ+ष्+आ – ..............................

vi. ज्+ञ्+आ+न्+ए+च्+छ्+उः – ..............................

**अधुना वर्णविच्छेदस्य अभ्यासं कुर्मः**

| | | |
|---|---|---|
| **धनञ्जयः** | – | **ध्+अ+न्+अ+ञ्+ज्+अ+य्+अः** |
| **प्रयच्छति** | – | **प्+र्+अ+य्+अ+च्+छ्+अ+त्+इ** |
| **स्वार्थान्धः** | – | **स्+व्+आ+र्+थ्+आ+न्+ध्+अः** |
| **चिरञ्जीवः** | – | **च्+इ+र्+अ+ञ्+ज्+ई+व्+अः** |

**2. एवमेव एतेषां पदानामपि विच्छेदं कुरुत —**

i. विद्यालयः – ..............................

ii. पुत्रप्रीत्या – ..............................

© NCERT not to be republished

iii. आज्ञापयति – ..........................................................................

iv. प्रभृति – ..........................................................................

v. प्रतीक्षा – ..........................................................................

vi. अश्रद्धेयम् – ..........................................................................

vii. सुरक्षितम् – ..........................................................................

**अत्र वयं पश्याम: यत् स्वर-व्यञ्जनानां संयोजनेन शब्दनिर्माणं भवति। अत्र एतदपि ध्यातव्यं यत् —**

- 'स्वयं राजन्ते इति स्वरा:'
- अर्थात् स्वराणाम् उच्चारणाय अन्यवर्णस्य आवश्यकता न भवति परं व्यञ्जनानाम् उच्चारणाय स्वरा: सदैव अपेक्ष्यन्ते।
- स्वराणामपरं नाम अस्ति अच् इति।
- व्यञ्जनानां चापरं नाम अस्ति हल् इति।
- स्वरेण विरहितस्य व्यञ्जनवर्णस्य लेखनाय हलन्तचिह्नम् ( ् ) इति प्रयुज्यते। अत्र वर्णविन्यासं कर्तुं सदैव ध्यातव्यं यत् कोऽपि व्यञ्जनवर्ण: हलन्तचिह्नेन विना न लेखनीय:।

किं भवन्त: जानन्ति यत् सर्वेषाम् वर्णानाम् उच्चारणाय मुखे विशिष्टस्थानं वर्तते।

मयङ्क: – मोहन! इति उच्चारणक्रमे 'म' इति वर्णस्य उच्चारणे ओष्ठ: अपरम् ओष्ठं स्पृशति परं 'ह', 'न' इति पदयो: उच्चारणे ओष्ठ: न स्पृश्यते इति एतदनुभूयते।

अध्यापिका– आम्। यत: हकारस्य उच्चारणस्थानं कण्ठ: नकारस्य च दन्ता:।

तन्वी – आम्। मम नाम्नि अपि तकारस्य उच्चारणे जिह्वा दन्तान् स्पृशति।

शान्ति: – आम्। मम नाम्नि अपि शकारस्य उच्चारणं तालुना, परं नकारतकारयो: उच्चारणं मुखस्य सहायतया भवति (सर्वे छात्रा: शिक्षिकां प्रति)

महोदये! एतत् तु न कदापि विचारितम् यत् कथमस्माकं जिह्वा जानाति यत् कस्य वर्णस्य उच्चारणं मुखस्य केन भागेन कर्तव्यम्।

शिक्षक: (विहस्य) एतत् तु अतीव वैज्ञानिकं रहस्यम् यद् ज्ञात्वा वयं सकार-शकार-षकार इति वर्णानाम् उच्चारणे अवबोधने च त्रुटिकर्तॄन् बोधयितुं क्षमा: उच्चारणदोषं च मार्जयितुमपि समर्था:। अधुना उच्चारणस्थानानाम् अभ्यासं कुर्म:।

© NCERT not to be republished

**1. एतेषां वर्णानाम् उच्चारणस्थानं लिखत–**

i. ट् ................ ओ ................ य् ................ ण् ................

ii. थ् ................ ज् ................ ग् ................ उ ................

iii. ए ................ न् ................ ऋ ................ व् ................

**2. एतेषु मूर्धन्यवर्णान् गोलाकार-युक्तान् कुरुत –**

च्, ल्, ए, म्, आ, ष्, य्, उ

**3. प्रदत्तानि उच्चारणस्थानानि अधिकृत्य द्वौ वर्णौ लिखत –**

i. ओष्ठ्य: – ................ दन्त्य: – ................

ii. तालव्य: – ................ कण्ठ्य: – ................

iii. कण्ठोष्ठ्य: – ................ नासिक्य:– ................

**4. प्रदत्तपदेभ्य: यथानिर्दिष्टम् उच्चारणस्थानानुरूपं वर्णान् चित्वा लिखत –**

i. जाड्यम् – (मूर्धन्यवर्ण:)
ii. वर्तते – (दन्तोष्ठ्यवर्ण:)
iii. स्वीकरोतु – (तालव्यवर्ण:)
iv. विहितम् – (कण्ठ्यवर्ण:)
v. प्रतिज्ञा – (ओष्ठ्यवर्ण:)
vi. उत्थाय – (दन्त्यवर्ण:)
vii. पाषाणतले – (ओष्ठ्यवर्ण:)
viii. प्राणिनाम् – (नासिक्यवर्ण:)
ix. आश्रमे – (कण्ठतालव्य:)
x. लतासु – (दन्त्यवर्ण:)

**5. वर्णानाम् उच्चारणस्थानानां सरलतया ज्ञानार्थम् एतानि सूत्राणि स्मरत –**

i. अकुहविसर्जनीयानां कण्ठ:। (अ, आ, कवर्ग, ह विसर्ग)
ii. इचुयशानां तालु:। (इ, ई, चवर्ग, य्, श्)
iii. ऋटुरषाणां मूर्धा। (ऋ, ॠ, टवर्ग, र्, ष्)
iv. लृतुलसानां दन्ता:। (लृ, तवर्ग, ल्, स्)

v. उपूपध्मानीयानामोष्ठौ। (उ, ऊ, पवर्ग, उपध्मानीय)
vi. ञमङणनानां नासिका। (ञ्, म्, ङ्, ण्, न्)
vii. एदैतोः कण्ठतालु। (ए, ऐ)
viii. ओदौतोः कण्ठोष्ठम्। (ओ, औ)
ix. वकारस्य दन्तोष्ठम्। (व)
x. नासिकाऽनुस्वारस्य। (अनुस्वार)

© NCERT not to be republished